वाराणसेयसंस्कृतविश्वविद्यालयदर्शनपरिषदधिवेशनस्य

सभापतीनां

प्राध्यापक-श्रीको० अ० सुब्रह्मण्य-अय्यरमहोदयानां

सभापतिभाषणम्

दिसम्बर १९६२

अथ खल्वेतस्मिन् सदसि सन्निहितानां तत्तच्छास्त्रनिरन्तरपरिशीलनपरिष्कृतमानसानां काश्यामन्यत्र वा लब्धप्रतिष्ठानां विदुषां पुरतः समुपस्थितेन मया साध्वससंमिश्रो महान् हर्षः समनुभूयते। वाराणसेयसंस्कृतविश्वविद्यालयान्तर्गतदर्शनपरिषदधिकारिभिः सौहार्दप्रेरितैर्योग्यतानिरपेक्षमस्याः परिषदः साम्प्रतिकाधिवेशनस्य साभापत्यं यन्मयि समारोपितं तस्याविचार्य स्वीकरणेन मया महत् साहसमाचरितम्। पूर्वपरिचितानां मयि प्रदर्शितसुहृद्भावानां विदुषां पुनर्दर्शनस्य, अपरिचितविद्वज्जनपरिचितेश्च दुर्लभोऽयमवसरो न परिहातव्य इति बुद्ध्या कृतमिदं साहसमिति मर्षयितव्योऽयं जनः।

महदानन्दास्पदमिदं यदितः कतिपयवर्षेभ्यः प्राक् संस्थापितेयं दर्शनपरिषन्निरन्तरं स्वकीये कर्मणि प्रवर्तमाना दृश्यते। भारतीयसंस्कृतेर्विकासे दर्शनानां किं स्थानं कश्च प्रभाव आसीदिति विदितमेव सदस्यमहाभागानाम्। जगति समुपलभ्यमानेषु सर्वेष्वपि प्राचीनवाङ्मयेषु विपुलतमं विचित्रतमं च संस्कृतवाङ्मयमिति कथने काचिदत्युक्तिर्न स्यात्। तत्रापि दर्शनविषयकोंऽश इतरविषयकांशापेक्षया नितरां प्रचुर इति सर्वविद्वज्जनप्रत्यक्षमेतत्। य एते पुरा कृतभारतीयसंस्कृत्याधारशिलान्यासा मन्त्रद्रष्टारो महर्षयः, ये च वेदाङ्गानां प्रतिष्ठापका आचार्याः, ये चायुर्वेदादिदृष्टप्रयोजनकशास्त्रप्रणेतारो महापुरुषाः चरकसुश्रुतप्रभृतयः, ये चास्तिकदर्शनषट्कस्य नास्तिकदर्शनषट्कस्य च प्रतिष्ठापका महाचार्याः, तदन्वये प्रादुर्भूतास्तन्मतस्यैवोपपादका उपोद्बलका महाव्याख्याकारा विद्वांसश्च, ते सर्वे साक्षात् परम्परया वा दार्शनिका एवासन्। तेषां कृतय एवाद्यापि सर्वत्र भारतवर्षे महत्या श्रद्धया परिशील्यन्ते। तत्र प्रतिपादितानां तत्त्वानां गाम्भीर्येण सर्वेषां जनानां भारतीयसंस्कृतेरुत्कर्षे महत्यादरबुद्धिः प्रादुर्भवति। तेषां सम्यगवबोधार्थं कृतेन तपसा विदुषां ये चरित्रगुणा बुद्धिगुणाश्च विकसिता भवन्ति, तैस्तेषां प्रभावो निखिलं समाजमभिव्याप्नोति; तैश्च गुणैर्विद्वद्भिः स्वसन्ताने संक्रामितैर्निखिला मनुष्यजातिः समुन्नतेः परां काष्ठां प्राप्नोति।

भारतीयसंस्कृतौ दर्शनानां यद् विशिष्टं स्थानं तद्द्योतकमिदमपि न विस्मरणीयमस्माभिर्यदत्र दर्शनातिरिक्ता अपि विद्या दर्शनत्वसमासादनप्रवणा भवन्ति। सर्वास्वपि ग्रीक-रोमनादिप्राचीनसंस्कृतिषु व्याकरणशास्त्रं महान्तं विकासमवाप। अफलातून-अरस्तू-डायोनिसियस-त्राक्स-

प्रभृतिभिर्ग्रीकविमर्शकैर्डोनाटस-प्रिसियनप्रभृतिभी रोमनविमर्शकैश्च स्वस्वभाषासंबन्धीनि भाषासामान्यसंबन्धीनि च बहूनि सरसानि तत्त्वान्याविष्कृतानि, परं तु न ग्रीसदेशे न वा रोमदेशे व्याकरणं दर्शनत्वमवाप। भारतवर्षे तु व्याकरणस्य दर्शनत्वं तत्रभवता भर्तृहरिणा तस्य वाग्योगद्वारा मोक्षोपायत्वसमुद्घोषणेन माधवाचार्यैः स्वकीये सर्वदर्शनसंग्रहे पाणिनिदर्शनसन्निवेशेनान्यैश्च बहुभिर्लिङ्गैः स्पष्टं प्रतीयते। साहित्यस्यापि दर्शनैः सह संबन्धो बहुभिः श्रद्धार्हैर्विद्वद्भिरभ्युपगम्यते। इयता संतुष्टाः केचिद् गम्भीरविचारशीला विपश्चितस्तस्य स्वयं दर्शनत्वं प्रकीर्तयन्ति। लक्ष्यरूपस्य साहित्यस्याथवा काव्यस्य दर्शनानां च परस्परं संबन्धः स्पष्ट एव। भारतीयविचारपद्धत्यनुसारेण सर्वाण्यपि दर्शनानि काव्ययोनय इति राजशेखरेण स्वकाव्यमीमांसायां परिगणितेषु षोडशसु काव्ययोनिषु प्रमाणविद्याया अपि समुल्लेखदर्शनादस्माभिरनुमातुं शक्यते। प्रमाणविद्याशब्देन प्रायेण सर्वाणि दर्शनान्येवाभिप्रेतानि। "सर्वपार्षदत्वात् काव्यविद्यायास्तानिमानन्यांश्चार्थान् व्युत्पत्तये प्रत्यवेक्षेत" इति वदता राजशेखरेण कवीनां सर्वेभ्यो दर्शनेभ्योऽर्थग्रहणशीलत्वं सम्यगुपवर्णितम्। उदाहृतं चैतद् बहुधा। निखिलमिदं प्रबोधचन्द्रोदयनामकं नाटकं वेदान्तदर्शनमवलम्ब्य प्रवृत्तमिति जानन्त्येव सदस्यमहाभागाः। लक्षणरूपस्यापि साहित्यस्य दर्शनैः सह सम्बन्धो भिन्नप्रकारोऽपि तथैव स्पष्टः। प्रायेणालङ्कारशास्त्रे दार्शनिका एव पूर्वपक्षिण इत्यनेनैव दर्शनानां साहित्यस्य चांशतो विषयसाम्यमवगम्यते। पूर्वपक्षिणां सिद्धान्तिनां च मतभेदेऽपि विषयैक्यं तु भवत्येव। एतावदेव न, केचिदालङ्कारिकाः स्वयं दार्शनिका अप्यासन्। आलङ्कारिकशिरोमणिरानन्दवर्धनाचार्यः साहित्यविषयकं ध्वन्यालोकमिव दर्शनविषयकं तत्त्वालोकनामकं ग्रन्थमपि रचयामासेति ध्वन्यालोकलोचनवचनादवगम्यते। अस्माकं दुर्भाग्यमिदं यदयं ग्रन्थोऽधुना नोपलभ्यते। तदवलोकनेनैव ध्वनिवादस्य दर्शनैः सह सम्बन्धः सम्यगवगतो भवेत्। लोचनकाराणां श्रीमदभिनवगुप्ताचार्याणां प्रत्यभिज्ञादर्शनव्याख्यातॄणां महामाहेश्वराचार्यबिरुदभाजां दार्शनिकमूर्धन्यत्वं सर्वविदितमेव। एवं च चित्रमीमांसा-कुवलयानन्दादिसाहित्यविषयकग्रन्थरचयितृभिः श्रीमदप्पय्यदीक्षितैः परिमल-शिवार्कमणिदीपिका-सिद्धान्तलेशसंग्रह-पूर्वमीमांसावादनक्षत्रमाला-मयूखावल्यादिग्रन्थनिर्माणेनात्मनो दार्शनिकधुरन्धरत्वमपि प्रदर्शितम्। एवं साहित्यस्योभयोरपि रूपयोर्दर्शनैः सह घनिष्ठः संबन्धः सिद्धो भवति। एतावदेव न, साहित्यस्य स्वयं दर्शनत्वमिच्छन्ति केचिद् विद्वांसः। सर्वमपि तत्त्वज्ञानसाधकं शास्त्रं दर्शनम्, अथवा चेतनस्य प्रधानत्वेन प्रतिपादकं शास्त्रं दर्शनमिति दृष्टिमवलम्ब्य "रसो वै सः" इति श्रुत्युक्तं रसस्य चैतन्यात्मकत्वं चाश्रित्य काव्यस्य तत्प्रतिपादकशास्त्रस्य च तत्तत्स्थाय्युपहितब्रह्मचैतन्यसाक्षात्कारसाधनत्वाद्दर्शनत्वप्रतिज्ञा सुतरामादरार्हा।

सभापतिभाषणम्

एवं दर्शनप्रधानाया भारतीयसंस्कृतेरध्ययनार्थं संस्थापितेऽस्मिन् संस्कृतविश्वविद्यालये विलसन्तीयं दर्शनपरिषदध्यापकानां विद्यार्थिनां चोत्साहं समुद्बोधयतीति दृष्ट्वा नितान्तं प्रमुदितं मे चेतः। अस्माकं शासनाधिकारिभिर्बहु विमृश्य प्रतिष्ठापितोऽयं विश्वविद्यालयः, अथवा पूर्वस्थितराजकीयसंस्कृतमहाविद्यालयस्य विश्वविद्यालयत्वेन परिणामः कृतः। विद्वत्समाजेच्छानुगुण्येनैव कृतमिदं परिवर्तनं शासनेन। विश्वविद्यालयप्रतिष्ठापनावसरे जनताया हृदये बह्व्यः प्रत्याशाः समुत्पन्ना आसन्। परम्परागताया विद्यायाः संरक्षणम्, आङ्ग्लशासनकाले भारतीयशिक्षापद्धतौ निकृष्टं स्थानमधिष्ठितायाः संस्कृतशिक्षायाः समुन्नतिः, प्राचीनपद्धत्या कृतविद्यानां विदुषां पुनः समादरणम्, सर्वप्रकारासु राजसेवासु संस्कृतज्ञानां प्रवेशः, विदेशस्थेषु भारतीयदूतावासेषु भारतीयसंस्कृतिरहस्यज्ञानां नियुक्तिः—इत्यादिविषयिकाः प्रत्याशाः संस्कृतज्ञानां हृदयेषु प्रादुरभवन्। यदा चानेन विश्वविद्यालयेन "श्रुतं मे गोपाय" इति वाक्यं मूलसिद्धान्तत्वेन स्वीकृत्य स्वमुद्रायां सन्निवेशितम्, तदा विदुषां चेतसि महानानन्दः समजनि। श्रुतस्य संरक्षणं नाम किमिति सम्यगवगन्तव्यमस्माभिः। व्यापिकया सर्वतोमुख्या च दृष्ट्या संरक्षणार्थोऽस्माभिर्बोद्धव्यः। परम्परागतस्य वैदिकबौद्धार्हतादिधर्मानुसारिभिर्भारतीयैरितरदेशाभिजनैर्वा महर्षिभिराचार्यैश्च विरचितस्य संस्कृततत्प्रकृतिकभाषानिबद्धस्य वाङ्मयस्य पठनपाठनविधिः, तत्र प्रतिपादितानां तत्त्वानामात्मसात्कृत्य योग्यशिष्येषु संक्रामणमितीदं संरक्षणविधेः प्रथमं पदम्। तच्च विश्वविद्यालयस्थापनात् प्रागेव भारते तत्र तत्र समुपलभ्यमानासु सर्वासु संस्कृतपाठशालासु भवति स्म। विशेषतः काशिकराजकीयसंस्कृतमहाविद्यालये निखिलायामीशवीयोनविंश्यां शताब्द्यामीशवीयविंशशताब्द्याः प्रथमार्धे च निरन्तरमिदमेव कर्म महता साफल्येनानुष्ठीयते स्म। अस्मिन् कर्मणि प्राप्तयशसां विदुषां नामान्यद्यापि सश्रद्धं स्मर्यन्ते समस्ते भारतवर्षे। विश्वविद्यालयत्वेन परिणतायामस्यां संस्थायामेतावत्येव कर्मणि क्रियमाणे किञ्चिन्नवीनत्वं वैशिष्ट्यं वा न स्यादिति बहूनामादरणीयवचसां विदुषामभिप्रायः। न्यस्तेऽपि प्रथमे पदे यावदनन्तरमपि पदं नाधीयते तावत् संरक्षणकर्मैव न सुष्ठु सम्पन्नं स्यादिति तेषामाशयः। प्रथमं पदं भवति सिद्धस्य ज्ञानराशेरात्मसात्करणरूपमतीतोन्मुखम्। श्रुतस्य गोपनविधावेदमेव समनन्तरं द्वितीयं पदं यदसिद्धस्य ज्ञानराशेः समुपार्जनरूपं भविष्यदुन्मुखत्वमिति।

भारतीयदर्शनानामैतिहासिक्या दृष्ट्याध्ययने क्रियमाणेऽस्माकं पूर्वाचार्यैः श्रुतस्य संरक्षणार्थमुभयोरप्यनयोर्मार्गयोः समाश्रयणं कृतं दृश्यते। अर्वाचीनैराचार्यैः पूर्वाचार्यप्रतिपादितानामेव मूलतत्त्वानामुपपादनं कुर्वद्भिरपि स्वसमयानुगुणशैलीसमाश्रयणेन तेषां नवीकरणमिव कृतम्।

श्रुत्यन्तभूतासूपनिषत्सु, श्रीमद्बादरायणाचार्यकृतेषु ब्रह्मसूत्रेषु, शङ्करभगवत्पादकृतशारीरकभाष्ये, आचार्यमधुसूदनसरस्वतीचरणविरचितायामद्वैतसिद्धौ च तस्यैव ब्रह्माद्वैतवादस्य मुख्यतया प्रतिपादनं कृतमिति सर्वसम्मतमेतत्। एवंस्थितेऽपि पूर्वपूर्वग्रन्थापेक्षया परस्मिन् परस्मिन् ग्रन्थेऽस्ति किञ्चिद् वैशिष्ट्यम्, काचिन्नवीनतेति को वा नाभ्युपगच्छेत्। उपनिषदां ब्रह्मसूत्राणां च न केवलं सूत्राबद्धत्व-तद्बद्धत्वकृतो विशेषः। अल्पाक्षरसूत्रबद्धायामपि श्रीमद्बादरायणकृतौ निखिला अपि वेदान्तविषयाः समन्वयाविरोधसाधनफलनामकेषु चतुर्ष्वध्यायेष्वन्तर्भाविताः। सर्वेषामध्यायानां बहुभिरधिकरणैः सर्वेषामप्यधिकरणानां संदेहपूर्वपक्षसिद्धान्तरूपैरंशैश्च विभागः कृतः। समस्तेयं कृतिः परपक्षप्रतिक्षेपपूर्वकस्वपक्षस्थापनरूपत्वात् तर्कबहुला दृश्यते। सर्वमिदं रोचकोपाख्यानबहुलाभ्यो महर्षितच्छिष्याणां परस्परसंवादरूपाभ्य उपनिषद्भ्यो मूलसिद्धान्ताभेदेऽपि बाढं विलक्षणम्। उपनिषत्सु प्रतिपादिताः सर्वेऽप्यर्थास्तत्र क्रोडीकृताः। तत्राविद्यमानोऽपि तदनुकूलस्तर्कस्तत्र सन्निवेशितः। ईदृशमेव वैलक्षण्यं ब्रह्मसूत्राणां शङ्करभगवत्पादकृतभाष्यस्य च। साक्षाद् ब्रह्मसूत्राणां परम्परया चोपनिषदां तात्पर्यनिर्णयपरमिदं प्रसन्नगम्भीरं भाष्यम्। ब्रह्मसूत्रान्तर्गतस्य तर्कांशस्य तदतिरिक्त-तर्कशतैरुपनिषद्वाक्यसहस्रैश्चोपबृंहणं सूत्राणां संक्षेपप्राणत्वात्तत्रानुल्लिखितानां बहूनां वेदान्तदर्शनस्य संपूर्णत्वसंपादकानां तत्त्वानामुचितेषु स्थानेषु सन्निवेश इत्यादि यच्छारीरकभाष्यस्य वैशिष्ट्यं तेनैव तस्य स्वप्रादुर्भावकालेऽसिद्धस्य ज्ञानराशेः समुपार्जनानुकूलग्रन्थरत्नेषु गणना संजाता। अन्ततो विमृश्यतामाचार्यमधुसूदनसरस्वतीचरणविचरिता अद्वैतसिद्धिः। ऐतिहासिक्या दृष्ट्या ग्रन्थरत्नमिदं स्वाविर्भावकाले वेदान्तदर्शनस्य महान् नवोन्मेष आसीत्। पूर्वसिद्धं निखिलमपि वेदान्तशास्त्र-मात्मसात्कृत्य स्वसमयसमुपलभ्यमानपरिस्थितिं च पर्यालोच्याचार्यवर्यैर्ग्रन्थरत्नमिदं विरचितम्। आचार्यपादानां समये नव्यन्यायशास्त्रस्य भारते महती प्रतिष्ठासीत्। दार्शनिकतत्त्वानां निरूपणं विवेचनं च यावन्नव्यन्यायसम्मतया शैल्या तदीयपारिभाषिकशब्दानां प्रयोगेण च न क्रियते, तावद् विद्वत्समक्षं स्वपक्षस्थापनं परपक्षखण्डनं च दुष्करं भवति स्म। एतस्यां परिस्थितौ आचार्यवर्यै-र्नव्यन्यायशैलीमवलम्ब्य परपक्षप्रतिक्षेपपूर्वकं वेदान्तसिद्धान्तानां प्रतिष्ठापनं संरक्षणं च कृतम्। तदा प्रभृत्यद्य यावत् सर्वत्र वेदान्तदर्शने प्रौढपाण्डित्यप्रेप्सुभिर्विद्वद्भिरस्य ग्रन्थस्य सम्यक् परिशीलनं क्रियते। समयानुगुण्येन पूर्वसिद्धज्ञानराशेः संरक्षणपूर्वकं नवीनज्ञानराशेः समुपार्जनस्य शोभन-मिदमुदाहरणं भवति।

शब्दाद्वैतवादस्यापीतिहासोऽस्मिन् प्रसङ्गे विचारार्हः। अयं वादः संस्कृतवाङ्मये

बहुत्रोपवर्णितो दृश्यते। वेदेषु मुनित्रयस्य कृतिषु तत्रभवतो भर्तृहरेर्वाक्यपदीये नागेशभट्टविरचितायां लघुमञ्जूषायां च यदस्य वादस्य वर्णनमुपलभ्यते, तदस्माभिर्विशिष्य विमर्शनीयम्। वेदेषु बहूनामन्यवादानामिवास्य वादस्यापि बीजानि समुपलभ्यन्ते। श्रुतिषु वाग्विषयकाणि तत्तद्दृष्टिमवलम्ब्य व्याहृतानि बहूनि वाक्यानि समुपलभ्यन्ते। कदाचिच्छ्रुतिस्तैस्तैरिन्द्रवायुचन्द्रादित्याग्निविराट्प्रजापतिसमुद्रसलिलसंवत्सरसावित्रीसरस्वतीसुपर्णाद्यौरन्तरिक्षपृथिवीबृहत्यनुष्टुब्मनोमतियज्ञादिभिस्तत्त्वैर्वाचस्तादात्म्यं प्रतिपादयति। केषुचित्—

वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।
अथेद् वाग् बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह॥

इत्यादिमन्त्रेषु संहृतभोग्यभोक्तृशक्तेर्बहुधा कारणत्वमाम्नातम्। तथा—

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥

इत्यादिके ऋग्वेदमन्त्रे सच्चिदानन्दात्मकेन परमात्मना तादात्म्यमनुभवन्ती वागाम्भृणी सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामि, मयि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सद् दृश्यते इति च प्रोद्घोषयति। शब्दाद्वैतस्य मूलतत्त्वानां छान्दस्या तर्करहितया गौरवान्वितया वाचा प्रतिपादनपरा एते मन्त्राः।

मुनित्रयस्य कृतिष्वष्टाध्याय्या मुख्यतः शब्दान्वाख्यानरूपत्वादतिसंक्षिप्तसूत्ररूपत्वाच्च भगवता पाणिनिना दार्शनिकविषयनिरूपणं स्वकण्ठत एव न कृतम्, तथापि केषाञ्चित्सूत्राणामर्थपर्यालोचनया भगवतः कानिचिद् दार्शनिकमतान्यनुमातुं शक्यन्ते। यथा एकशेषारम्भाद् भेद्यत्वं द्रव्यलक्षणमनुमीयते, द्रव्याणां प्राधान्येन वाच्यत्वे शब्दभेदप्रसक्तेस्तदारम्भस्यार्थवत्त्वात्। एवमेव स्त्रियां पुंसि नपुंसके इति सामान्येन शब्दान्वाख्यानेऽर्थस्याङ्गभावापादनात् संस्त्यानप्रसवस्थितयोर्लिङ्गलक्षणमनुमीयते। वार्त्तिकानां लक्षणत एव उक्तानुक्तदुरुक्तार्थव्यक्तिकारित्वात्तत्राष्टाध्याय्यामनुपलभ्यमानमपि तदर्थस्यैव स्पष्टीकरणरूपं बहूपलभ्यते, अतश्च विपुलस्तत्राभिनवो ज्ञानराशिः संचितो दृश्यते, यस्यैको महानंशो व्याकरणदर्शनविषयकः। 'सिद्धे शब्दार्थसंबन्धे' इति प्रथममेव वार्त्तिकं शब्दाद्वैतवादस्याङ्गतत्त्वभूतं शब्दार्थसंबन्धानां नित्यत्वं प्रतिपादयति। व्याकरणदर्शनस्यावान्तरविषयभूतजातिद्रव्यगुणदिक्साधनक्रियाकालसंख्यापुरुषोपग्रहलिङ्गादिस्वरूपनिरूपणविवेचनपराणि बहूनि वार्त्तिकानि तत्र तत्र विप्रकीर्णानि दरीदृश्यन्ते। सूत्राणि वार्त्तिकानि

च युगपद् परीक्षितुं प्रवृत्तैर्महाभाष्यकारैस्तु व्याकरणशास्त्रस्य दर्शनांशमधिकृत्य यद्यपि ललितललितैरपि गम्भीरैर्मनोहरैश्च पदैर्बहूक्तम्, तथापि न तत् सर्वमेकत्रोक्तम्; किन्तु तत्र तत्रोक्तमिति भृशं विप्रकीर्णम्। एवं स्थितेऽपि व्याकरणदर्शनगतानि सर्वाणि मूलतत्त्वान्यङ्गतत्त्वानि च भाष्ये यत्र कुत्रचिदुल्लिखितान्युपलभ्यन्त इत्यत्र बहून्युदाहरणानि दातुं शक्यन्ते। अत एव प्रक्रियांशस्येव दर्शनांशस्यापि महाभाष्यमेव मुख्य उपलभ्यमान आकरग्रन्थ इति सर्वैरर्वाचीनैर्विद्वद्भिरैकमत्येनाभ्युपगम्यते। भगवता पाणिनिना कात्यायनेन च महता परिश्रमेण संचितं ज्ञानराशिं महत्या श्रद्धयात्मसात्कृत्य तस्य विस्तरेण परीक्षात्मकव्याख्यानावसरे तस्य गुणदोषान् प्रदर्श्य भगवता भाष्यकारेण व्याकरणशास्त्रस्योभयोरपि प्रक्रियांशदर्शनांशविषयकयोर्ज्ञानराश्योः संवर्द्धनं कृतम्।

तत्रभवान् भर्तृहरिर्महाभाष्यकारापेक्षया व्याकरणदर्शनेतिहासे बहुभिर्वर्षशतैरर्वाचीनः। अस्मिंश्च महति कालान्तरे भारतवर्षे दर्शनानां महान् विकासः संजातः। एकतो महर्षिजैमिनिबादरायणयोरनुपमया प्रतिभया पूर्वोत्तरमीमांसयोः, महर्षिगौतमकणादवात्स्यायानप्रशस्तपादानां परिश्रमेण न्यायवैशेषिकदर्शनयोः, आचार्येश्वरकृष्णमाठरव्यासचरणानां ग्रन्थरत्नैः सांख्ययोगयोः सम्यक् प्रतिष्ठापनेन देशे आस्तिकदर्शनानां महान् समुन्मेषोऽभूत्; अपरतो नास्तिकदर्शनान्यपि महत्या स्पर्धया सर्वत्र भारतवर्षे वर्धमानानि, भारताद्बहिरपि पार्श्ववर्तिनो दूरस्थितान् वा देशानाक्रम्यास्त्रशस्त्रादिप्रयोगं विनैव केवलं स्वोत्कर्षेण तत्र स्थितान् जनान् वशीकृत्य तत्र रूढमूलानि बभूवुः। तत्र विश्वविश्रुतकीर्तेः स्थविरवादमर्मज्ञस्य विसुद्धिमग्गादिप्रसन्नगम्भीरग्रन्थकर्तुराचार्यबुद्धघोषस्य नाम केन न श्रुतं स्यात्। माध्यमिकशास्त्रप्रणेता आचार्यनागार्जुनस्तावत् स्वबुद्धिवैभवेन प्राचीनभारतीयवैदुष्यस्य परां काष्ठां प्राप्तः सर्वानस्मानद्यापि भारतीयत्वाभिमानिनः करोति। अन्येऽपि सौगता आचार्या आर्यदेव-चन्द्रकीर्ति-शान्तिदेव-असङ्ग-वसुबन्धु-दिङ्नागप्रभृतयः प्रकृते कालान्तरे भारतीयविद्वत्समाजललामभूताः पूर्वसंचितज्ञानराशेः संवर्द्धने महान्तं प्रयत्नमकुर्वन्। यस्य प्रयत्नस्य स्वादूनि फलानि बहुधा लुप्तप्रायाण्यप्यवशिष्टान्यस्माभिरद्याप्यास्वादयितुं शक्यन्ते। तत्तदास्तिकनास्तिकदर्शनानुयायिनामेतेषामाचार्याणां कृतिषु शब्दतत्त्वमधिकृत्य बहुधा विचारः कृतो दृश्यते। प्रमाणानां संख्यास्वरूपविषयको विचारः सर्वेष्वपि दर्शनेषु भवतीति सर्वविदितमेतत्, अतः शब्दस्य पृथक्प्रमाणत्वाप्रमाणत्वविषयको विमर्शः सर्वेषु दर्शनेषु प्रवृत्तः। पदार्थभूतशब्दस्वरूपपरिज्ञानेऽपि दार्शनिकानां महत् कुतूहलं भवति स्म। एवं दृष्टिद्वयमवलम्ब्य सर्वेष्वप्यास्तिकेषु नास्तिकेषु च दर्शनेषु शब्दविषयिका मीमांसा प्रवृत्ता। मुख्यतया शब्दमेव विषयत्वेन गृहीत्वा प्रवृत्ते व्याकरणशास्त्रे तु तमधिकृत्य बहु

लिखितमिति स्वाभाविकमेतत् । दार्शनिकाः शाब्दिकाश्चैकस्यैव विद्वत्समाजस्याङ्गभूताः परस्परपरिचयवन्तो मुहुर्मुहुर्गोष्ठीषु विचारविनिमये कृताभ्यासाः परस्परप्रभावेण परप्रदर्शितदोषसमुद्धरणप्रयत्नेन च स्वस्वदर्शनस्य परिष्कारं विकासं चाकुर्वन्निति विशिष्य कथनं नार्हति । वाक्यपदीयस्य रचनायां प्रवृत्तस्य तत्रभवतो भर्तृहरेर्न केवलं श्रुतिषु मुनित्रयविरचितकृतिषु च प्रतिपादितानि वाग्विषयकाणि तत्त्वानि विदितान्यासन्, अपि तु सर्वतन्त्रस्वतन्त्राणां तेषां तत्तदास्तिकनास्तिकदर्शनाचार्यसमुद्भाटितं शब्दविषयकं महन्मतवैचित्र्यमपि सुष्ठु परिचितमासीदिति वाक्यपदीयस्य स्वल्पपरिशीलनेनापि प्रतीयते । अतस्तेषां समक्षमिदमेव समयप्रभावानीतं कर्तव्यं समुपस्थितं यत् स्वकीयवैदिकपरम्परानुगुणाद्वैतित्वसंरक्षणपूर्वकं महाशाब्दिकमुनित्रयप्रतिष्ठापितसम्प्रदायानुसरणपुरःसरं यथासंभवं तत्तद्दर्शनानुकूल्येन, सत्यावश्यकत्वे दार्शनिकप्रसिद्धिं विहाय लोकप्रसिद्धपदार्थप्रक्रियासमाश्रयणेन च व्याकरणदर्शनगतपदार्थानां व्याख्यानमिति । विशदीकृतमिदं बहुशस्तत्रभवतो भर्तृहरेर्वैदुष्यस्य वैशिष्ट्यं वाक्यपदीयतृतीयकाण्डव्याख्याकारेण हेलाराजेन । तद्यथा तदीयजातिसमुद्देशव्याख्यायां दृश्यन्त इमानि वाक्यानि—(क) "एवं स्वनिकायसिद्धाध्यासदर्शनाश्रयेण सार्वत्रिकी जातिपदार्थव्यवस्था दर्शिता", (ख) "एवं शब्दव्यापाराश्रयेण व्याप्तिरुपपादिता । अधुना वैशेषिकदृष्ट्याप्यर्थगतसमानधर्माश्रयेण जातिपदार्थव्याप्तिमाह", (ग) "तदेवं वैशेषिकदर्शनाश्रयेण जातिपदार्थव्याप्तिरुपपादिता । इदानीं विज्ञादवादेनापि पदार्थव्यवस्थामाह", (घ) "एवं व्यतिरिक्तोपाधिदर्शनमुपन्यस्याधुना स्वशक्तय एवोपाधय इत्यद्वैतदर्शनाश्रयेणापि प्राह", (ङ) "एवं यथादर्शनं जातिः शब्देन प्रतिपाद्यत इत्युपपादितम् । सा च नित्येति नित्यः शब्दार्थः" इति । एवमेव द्रव्यसमुद्देशव्याख्यागतमिदं वचनमवलोक्यताम्—"एवं दर्शनान्तराश्रयेणोद्दिष्टेष्वपि दर्शनभेदेषु स्वसिद्धान्ताश्रयेण द्रव्यपदार्थव्यवस्थां कर्तुमाह" इति । "सर्ववेदपारिषदं हीदं शास्त्रम्" इति भाष्यकारवचनस्य "सर्वपार्षदं हीदं शास्त्रमिति स्वल्पपरिवर्तनेन न केवलमद्वैतदृष्ट्या, अपि तु दर्शनान्तरदृष्ट्यापि वैयाकरणसिद्धान्तानुपपादयति तत्रभवान् भर्तृहरिः । यथोक्तं हेलाराजेन—"परमार्थदृष्ट्यात्र सर्वपार्षदत्वात् पुनरस्य शास्त्रस्य दर्शनान्तरोपन्यासः । एष च सर्वत्रैवास्य ग्रन्थकारस्याभिप्रायः" इति । "शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्" इति भाष्यकारवचनद्योतिता—"वैयाकरणानां शब्दार्थोऽर्थः, न वस्त्वर्थोऽर्थः" इति दृष्टिस्तत्रभवता भर्तृहरिणावलम्बिता । एतद्दृष्टिद्वयसमाश्रयणेन शब्दार्थसम्बन्ध-जाति-द्रव्य-गुण-दिक्-साधन-क्रिया-काल-संख्या-पुरुष-लिङ्गादिव्याकरणदर्शनपदार्थानां विवेचने महद् वैशद्यमायातमिति वाक्यपदीयपरिशीलनेन स्पष्टं प्रतीयते । श्रीमद्भर्तृहरिपादैर्महाभाष्ये तत्र तत्र विप्रकीर्णानां व्याकरण-

दर्शनसंबन्धिनां तत्त्वानां संग्रहं कृत्वेदम्प्रथमतया तदेकविषयिकैका स्वतन्त्रा कृतिर्निबद्धा, यत्र स्वसमयावधि प्रादुर्भूतेषु तत्तद्दार्शनिकग्रन्थेषु प्रतिपादितानि शब्दविषयकाणि तत्त्वानि महता वैदुष्येण परीक्षितानि, स्वनिकायव्यवस्थया च लक्षितानीति तैः पूर्वसिद्धस्य ज्ञानराशेः स्वकृतौ सम्पूर्णतया सन्निवेशः कृतः, बहवश्च नवा अर्थास्तत्र संयोजिता इत्युभयथा श्रुतस्य गोपनं कृतम्।

एवमेकस्यैव दर्शनस्येतिहासे परीक्ष्यमाण इदं सिद्धं भवति यत् कालक्रमेण गुरुशिष्य-परम्परया प्रादुर्भवतां तद्दर्शनस्य प्रतिष्ठापकानां संवर्द्धकानां चाचार्याणां परस्परसंपर्कसंघर्षाभ्यामितर-दर्शनानुयायिभिश्च संपर्कसंघर्षाभ्यां पूर्वमसिद्धा अत एव नूतना मूलसिद्धान्तानुगुणाश्चार्थाः प्रादुर्भवन्ति, येन तद्दर्शनं नवीकृतमिव भवति, विद्यायाः संरक्षणं च संजायते। नवनवार्थप्रादुर्भाव एव श्रुतगोपनस्य लिङ्गम्, न केवलं परमावश्यकमपितु पूर्वसिद्धज्ञानराशेरात्मसात्करणम्। येन क्रमेण पुरा भारते विद्यायाः संरक्षणं वृद्धिश्च भवतः स्म, तेनैव क्रमेणाद्यापि भवितुमर्हति, अस्यैव क्रमस्य विद्यास्वरूपानुगुण्यात्। अद्यत्वे पुनरयं विशेषो यद् बहुभिः कारणैर्विशेषतः स्वातन्त्र्य-प्राप्त्याद्यास्माकं भारतीयानामिच्छतामनिच्छतां वा जगति समुपलभ्यमानाभिः सर्वाभिर्मनुष्य-जातिभिः सर्वैर्देशैः सर्वाभिः संस्कृतिभिः सर्वैश्च विद्याकेन्द्रैः सम्पर्कः संजातः। विद्याक्षेत्रेऽपि सम्पर्कोऽयं भवितुमर्हति। अस्मिन् सम्पर्के च बुद्धिपूर्वकं परिहृते विद्याया एव हानिर्भवेत्। श्रुतस्य गोपनविधौ यदस्य विश्वविद्यालयस्यानन्तरकरणीयं पदं तस्य सिद्धये जगति तत्र तत्र विकसद्भिर्दर्शनैर्विज्ञानैश्च सहात्रत्यविदुषां संपर्कसंस्थापनं परमावश्यकम्। यदा गतागतसौकर्यं नासीत् तदा संपर्कोऽपि न भवति स्म, यथा प्राचीनकालेषु। प्राचीनग्रीकसंस्कृतेः प्राचीनभारतीय-संस्कृतेश्च समसमयत्वेऽपि गतागतसौकर्याभावात् संपर्को विरल एवाभूत्। अद्यत्वे पुनर्यातायात-सौकर्यात् संपर्कः सुकरः। संस्कृतमहाविद्यालयेषु संस्कृतविश्वविद्यालयेषु च यानि प्राचीनानि दर्शनानि प्राचीना विद्याश्च परम्परागतसंस्कृतभाषानिबद्धवाङ्मयमवलम्ब्याधीयन्ते, तैर्दर्शनैस्ताभि-र्विद्याभिश्च समानानि दर्शनानि समानाश्च विद्यास्तेषु तेषु देशेषु ताभिस्ताभिर्भाषाभिरधीयन्ते विद्वद्भिः। भाषाभेदेऽपि विषयाः सदृशाः। सर्वेष्वप्येतेषु विद्याक्षेत्रेषु ज्ञानराशेर्वृद्धिर्भवति। संपर्कस्य बुद्धिपूर्वकं परिहारेण ये विद्वांसो विदेशेषु समानविद्याक्षेत्रेषु संभवन्तीं ज्ञानवृद्धिमुपेक्षन्ते, ते स्वयमेव स्वविद्यायाः संकोचं कुर्वन्ति। समानक्षेत्राणि कानीति चेत्, बहूनि सन्ति। कानि-चिदेवात्रोदाह्रियन्ते। तद्यथा—व्याकरण-भाषाविज्ञानयोः, मेटाफिजिक्स-वेदान्तदर्शनयोः, फिजिक्स-केमिस्ट्री-वैशेषिकदर्शनयोः, लॉजिक-नव्यन्याययोः, प्राचीनज्यौतिषाधुनिकास्ट्रानामीसंज्ञकविज्ञानयोः,

भारतीयगणिताधुनिकगणितयोः, पुराणेतिहासाधुनिकेतिहासयोः, आधुनिकचिकित्साशास्त्रायुर्वेदयोश्च समानविद्याक्षेत्रत्वमनायासेनाभ्युपगम्यम्। अन्यान्यपि बहूनि सन्ति।

यदिदमस्य विश्वविद्यालयस्य मुख्यलक्ष्यत्वेन स्वीकृतं श्रुतस्य गोपनं नाम, तस्य सिद्धौ समानविद्याक्षेत्रज्ञानं भृशमपेक्षितम्। तेनैवास्य विश्वविद्यालयस्य भविष्यदुन्मुखत्वं वैशिष्ट्यं च सिद्धयेत्। काममत्र पाठ्यक्रमे केषाञ्चिदाधुनिकविषयाणां सन्निवेशः संजातः, परन्तु विदेशीयैः समानविद्याक्षेत्रैः सह वास्तविकः संबन्धोऽद्यापि न संजातः। अयं प्रस्तुतः सम्पर्कोऽस्माकं भारतीयानामेव हिताय भवेदिति तु न, सम्पर्कस्य द्विष्ठत्वाद् यैः समानविद्याक्षेत्रैः सहास्माकं सम्पर्को भवेत्तेषामपि तेन विद्यावृद्धिरवश्यं भविष्यति। अस्य तत्त्वस्यैकमुज्ज्वलमुदाहरणमस्माकं पुरतस्तिष्ठत्येव। क्रिस्तीयोनविंश्यां शताब्द्यां पाश्चात्त्यविदुषां पाणिनीयव्याकरणपद्धत्या सह सम्पर्कः संजातः। अनेन सम्पर्केण तैराचार्यपाणिनेः संस्कृतशब्दानामन्वाख्यानक्रमः सम्यगवगतः। तस्य सौष्ठवेन वैज्ञानिकत्वेन च ते मुग्धा बभूवुः। तदा प्रभृति तत्साहाय्येन न केवलं संस्कृतभाषायाः, परन्तु जगति तत्र तत्रोपलभ्यमानानामन्यभाषाणां स्वरूपावबोधनम्, तद्गतशब्दानां पणिनिसम्मतया पद्धत्यान्वाख्यानम्, भाषाणां तुलनात्मिकया दृष्ट्याध्ययनम्, भाषामात्रस्य स्वरूपविवेचनमित्यादीनि भाषाविज्ञानान्तर्गतानि बहूनि कार्याणि पाश्चात्त्यदेशेषु सुष्ठुतरमनुष्ठीयन्ते। अनेन सम्पर्केण तेषु देशेषु भाषाविज्ञानं नवीकृतमिवाभूत्। तस्यामेव शताब्द्यां पाश्चात्त्यदेशीयानां भारतीयदर्शनैः सह सम्पर्क इदम्प्रथमतया संजातः, विशेषतो वेदान्तदर्शनेन। उपनिषदां ब्रह्मसूत्राणां शाङ्करभाष्यरामानुजभाष्ययोश्च ताभिस्ताभिः पाश्चात्त्यभाषाभिरनुवादोऽप्यभूत्। क्रमश इतरदर्शनग्रन्थानामप्यनुवादाध्ययनादिकं संजातम्। अद्य खलु तेषु देशेषु पाश्चात्त्यानां भारतीयानां च विदुषां परिश्रमेण जनानां भारतीयदर्शनज्ञानं वर्धते। अस्य परिणामस्य फलरूपेण तत्र दार्शनिकाः स्वकीयं पूर्वस्थितं भारतीयदर्शनानामज्ञानं दूरीकुर्वन्ति, भारतीयदर्शनैश्च कदाचित् प्रभाविता भवन्ति। जर्मनदार्शनिकस्य षोपनहवरस्योपनिषत्प्रभावितत्वं सुप्रसिद्धम्। अद्य खलु तेषु देशेषु योगाभ्यासे बहूनां शिक्षितानां जनानां रुचिर्दृश्यते। योगविषयका बहवो ग्रन्थाः पाश्चात्त्यैः स्वस्वभाषया निबद्धाः प्रतिवर्षं प्रकाश्यन्ते। योगाभ्याससौकर्यार्थं तत्र तत्राश्रमाणां स्थापनमपि श्रूयते। एवं भारतीयदर्शनैः सह सम्पर्केण पाश्चात्त्यसंस्कृतौ तत्र तत्र क्रमशः परिवर्तनमुपलक्ष्यते, पाश्चात्त्यदार्शनिकानां दृष्टौ वैदुष्ये च पूर्वस्थितसंकोचपरिहारेण गाम्भीर्यसंमिश्रा विशालता चायाति। भारतेऽपि प्राचीनपद्धत्या कृतविद्यानां दार्शनिकानां विदेशस्थसमानविद्याक्षेत्रैः सम्पर्केण संस्कृतौ वैदुष्ये च परिष्कारो भवितुमर्हति न वेत्यस्माभिर्विचारणीयम्। तत्तद्देशस्थानां दर्शनानां दार्शनिकानां विज्ञानानां

वैज्ञानिकानां च परस्परसंपर्कसंघर्षाभ्यामेव वैदुष्यस्य संस्करणसंवर्धनादिकं भवतीति भारतीयदर्शनानामितिहासविमर्शेनाधुनिकविज्ञानवृद्धिक्रमपरीक्षणेन च निःसन्देहं प्रतीयते।

भारतीयदर्शनानां विदेशीयसमानविद्याक्षेत्रैः सह सम्पर्के सति तुलनात्मिका दृष्टिरवश्यमुदियादध्ययने परीक्षणे च। सा च दृष्टिरनया परिषदाप्यनुमोद्यत इति "अभिनवानां प्राच्यप्रतीच्यदर्शनानां तुलनात्मकं समीक्षात्मकं चाध्ययनम्" इति निर्दिष्टं परिषदस्तृतीयमुद्देश्यं निबन्धनामावलौ "प्राच्यप्रतीच्यदर्शनसमीक्षा"-नामकं निबन्धवर्गं चोल्लिखितं दृष्ट्वानुमीयते। तुलनात्मकाध्ययनस्य सन्ति केचिद् गुणाः। द्वयोर्वस्तुनोः परस्परतुलनया द्वयोरपि स्वरूपं वैशद्येन प्रतीयते। तयोः साधर्म्यवैधर्म्यपरिज्ञानेन तयोर्गुणदोषा अपि स्पष्टा भवन्ति। तुलनात्मिकया दृष्ट्याधीयानस्य वैदुष्ये विशालता समायाति, हृदये चौदार्यं प्रादुर्भवति। गुणदोषौ सर्वत्रोपलभ्येते इत्यवगत्य स कुत्रापि द्वेषं न करोति, तस्य सहिष्णुता वर्धते। अतस्तुलनात्मिका दृष्टिरध्ययनाङ्गत्वेन सर्वत्र स्वीक्रियते।

दृष्टिरियं सर्वेष्वपि विषयेषु सर्वेष्वपि च क्षेत्रेषु प्रयोक्तुं शक्यते प्रयुज्यते च। भाषाविज्ञानक्षेत्रेऽस्या दृष्टेः साफल्येन प्रयोगः सुप्रसिद्धः। योऽयं जगति व्यवह्रियमाणानां भाषाणामार्यभाषापरिवारः, सामीभाषापरिवारः, हामीभाषापरिवार इत्यादिभाषापरिवारैर्विभागः स खलु तुलनात्मिकया दृष्ट्याध्ययनस्यैव फलम्। यदिदं सामान्यभाषाविज्ञानमिति भाषाविज्ञानान्तर्गतमङ्गविज्ञानम्, तदपि तुलनात्मकाध्ययनस्यैव फलम्। अस्मिन् ह्यङ्गविज्ञाने भाषामात्रस्य स्वरूपनिरूपणे प्रयत्नः क्रियते। यदस्य प्रयत्नस्य सिद्धिः संजाता तत्रायमेव हेतुर्यत् प्रथमं तावद् विद्वद्भिर्बह्वीनां भाषाणामनया दृष्ट्याध्ययनं कृत्वा तासां विस्तरेण वर्णनं कृतम्। एतेषां विस्तृतानां वर्णनानां परीक्षणेन विद्वद्भिर्भाषामात्रविषयकाणि कानिचित्तत्त्वानि निष्कृष्टानि, येषां समूह एव सामान्यभाषाविज्ञानमित्युच्यते। अयत्वेऽस्याङ्गविज्ञानस्य प्रथममध्ययनं कृत्वैव भाषाविशेषाध्ययने प्रवर्तन्ते विद्वांसो विद्यार्थिनश्च पाश्चात्त्यदेशेषु। दर्शनानां क्षेत्रे पुनः स्थितिरियमधुना न संजाता। जगति प्रसिद्धानां भिन्नानां दर्शनानां वर्णनानि तु तैस्तैर्विद्वद्भिः कृतानि क्रियन्ते च। कुत्रचित् केषाञ्चिद् दर्शनानां तुलनात्मिकया दृष्ट्याऽध्ययनमपि संजातम्। परन्तु भाषाक्षेत्रे परिस्थितिरन्या दर्शनक्षेत्रे च परिस्थितिरन्या। अतः फलेऽपि महान् भेदः। भिन्नदेशेषु विराजमानानां दर्शनानां कदाचिदंशतः सादृश्यमुपलक्ष्यते, परं न तत् कस्यचिद् व्यापकस्य तत्त्वस्य द्योतकं भवति। प्रायेण सादृश्यमिदं यादृच्छिकम्। सर्वेषामपि मनुष्यबुद्धिप्रभवत्वाद् मनुष्यबुद्धेश्च सर्वत्रैकस्वरूपत्वात्तस्याः सृष्टिषु कदाचित्

साद्दश्यमुपलभ्यत इति स्वाभाविकमेतत् । न तेन कश्चिद् दार्शनिको निष्कर्षः समुदेति । स्रष्टॄणां देशकालजातिधर्मवर्णादिभेदात् तत्सृष्टिगतभेदानामेव प्राचुर्यात् । यथा भाषाणां तुलनात्मिकया दृष्ट्या परीक्षणेन भाषापरिवारप्रतिष्ठापनं सामान्यभाषाविकासश्चाभवताम्, तथा दर्शनानां परिवारविभागो वा सामान्यदर्शनविकासो वा न श्रूयते । यदिदं तुलनात्मिकया दृष्ट्याऽध्ययनेन विषयवैशद्यं भवतीति मया पूर्वं प्रतिपादितम्, तत् खलु सरसं स्पृहणीयं बुद्धिविवर्धनं च । परन्तु न तस्य किञ्चिद् दार्शनिकं महत्त्वम् । अध्ययनस्योपायमात्रं तत् । अतश्चाध्ययनसौकर्यसाधकसामग्र्यन्तर्गतम् । इदं त्वस्माभिः स्मरणीयं यद् दर्शनानां तुलनात्मकमध्ययनमितः कतिपयवर्षेभ्यः प्रागेवाविरभवत् । अतस्तदद्यापि शैशवावस्थायां वर्तते । तस्य विकासोऽवश्यं भवितुमर्हति । अद्यावधि यद् दर्शनानां तुलनात्मकमध्ययनं संजातम्, तत् खलु पाश्चात्त्यैर्भारतीयैर्वा विद्वद्भिः प्राच्यप्रतीच्यदर्शनविद्भिरनुष्ठितम् । तत्र भारतीयेषु विद्वत्सु प्राचीनपद्धत्या गुरुमुखादधीतविद्याः प्रायेणेदृशे तुलनात्मकेऽध्ययने न प्रवर्तन्ते, तेषां प्रायेण पाश्चात्त्यभाषानभिज्ञत्वात्, तद्भाषानिबद्धदर्शनग्रन्थपरिशीलनाशक्तत्वाच्च । ईदृशे कार्ये त एव विद्वांसः पटवो भवन्ति, ये बहुभाषाभिज्ञत्वात् प्राच्यप्रतीच्यदर्शनानां मूलग्रन्थाननुवादपरिहारेण साक्षादेव परिशीलयितुं समर्था भवन्ति । ईदृशा विद्वांसस्त्वस्मिन् समये स्वल्पसंख्याका एव भवन्ति, अथवाविद्यमानप्राया एव । परन्तु सज्जीकरणमावश्यकम् । सन्ति कानिचित् कार्याणि यानि तादृशैरेव विद्वद्भिः सम्पादयितुं शक्यन्ते । तेषु पूर्वोक्तं तुलनात्मकमध्ययनमेकम् । एकमपरमप्यधिकृत्य किञ्चिदुक्त्वा भाषणमिदं समाप्तिं नेष्यामि ।

भारतीयदर्शनानां ताभिस्ताभिः पाश्चात्त्यभाषाभिः प्रतिपादनमद्यत्वे सर्वत्र क्रियते । तत्र बहुभिर्भारतीयविद्वद्भिरप्याङ्गलभाषाभिज्ञैर्महान् सफलः परिश्रमः क्रियते । अस्यैव मार्गस्य विपर्ययेण प्राचीनानामाधुनिकानां च दर्शनानां संस्कृतभाषया गाम्भीर्येण विस्तरतश्च प्रतिपादनमद्यावधि न संजातम् । जानाम्यहं यत् केचिद् बालोपयोगिनो बाह्यस्थूलतत्त्वमात्रस्पर्शिनः पाश्चात्त्यदर्शनैकदेशविषयका ग्रन्थाः कैश्चिदुत्साहिभिर्विरचिता इति । प्रोत्साहनार्होऽयं तेषां परिश्रमः, परन्तु न तेन लक्ष्यसिद्धिर्भवेत् । यादृशं कार्यं मयात्राभिप्रेतं तादृशं कार्यं तु केवलेनोत्साहेन न सिद्ध्यति । पूर्वोक्तप्रकारेण भारतीयदर्शनप्रतिपादकानां संस्कृतभाषया निबद्धानां मूलग्रन्थानां वश्यता, तथैव पाश्चात्त्यदर्शनग्रन्थानां मूलत एव साक्षात् परिचय इत्युभयं यस्य विदुषोऽस्ति, स उत्साहसमन्वितः सन्नस्य कार्यस्य सम्पादने योग्यो भवेदिति मे प्रतिभाति । संस्कृतभाषा खल्वतीव परिमार्जिता सकलविधानामपि तत्त्वानां विशेषत आध्यात्मिकानां तत्त्वानामभिव्यञ्जनेऽतीव समुचितेति जानन्त्येव

विद्वांसः। तथापि कर्मेदं महाश्रमसाध्यम्। विदेशीयसंस्कृत्यन्तर्गततत्त्वानामभिव्यक्तौ कदाचिदनुरूपसंस्कृतशब्दोपलम्भो दुःसाध्यो भवेद् यथा भारतीयसंस्कृत्यन्तर्भूततत्त्वाभिव्यक्तौ विकसितास्वपि पाश्चात्त्यभाषासु कदाचिदनुरूपशब्दाभावो लेखकैरनुभूयते। यत्नोऽयं सर्वथा विधानार्हः। अद्वैततत्त्वानां तर्करहितया गौरवान्वितया वाचोपनिषत्सु प्रतिपादितानां शाङ्करभाष्यादिग्रन्थेषु प्रसन्नगम्भीरया तर्कसमन्वितया भाषयाभिव्यक्त्या महद् वैशिष्ट्यं समुद्भूतम्, तेषामेव पुनरद्वैतसिद्ध्यादिग्रन्थेषु नव्यन्यायपारिभाषिकशब्दप्रयोगसाहाय्येन ज्ञानानां साधर्म्यवैधर्म्यविवेचनशैलीसमाश्रयणेन कृतेन प्रतिपादनेन वैशिष्ट्यातिशयः समजनीति पूर्वमेव निर्दिष्टं मया। एकस्या एव संस्कृतेरेकस्यैव सम्प्रदायस्यान्तर्यदीयं स्थितिः, का कथा विदेशीयसंस्कृत्यङ्गभूततत्त्वप्रतिपादनप्रयत्नस्य? एवं स्थितेऽपि प्रयत्नोऽयं विधानार्हः। यतस्तेन प्रतिपिपादयिष्यमाणदर्शनस्य गुणदोषाः स्पष्टा भवेयुः, संस्कृतभाषाया अपि बलाबले स्पष्टे भविष्यतः, अन्ततश्च दोषाणामबलस्य च क्रमशो निराकरणं भविष्यति, संस्कृतबद्धदार्शनिकसाहित्यस्य च नवोत्थानं भविष्यति, अस्मिन् विश्वविद्यालये चाध्ययनशैल्या अतीतरक्षणसहितं भविष्यदुन्मुखत्वमपि सिद्ध्येत्। इत्येतावदेव ममास्मिन्नवसरे वक्तव्यमस्ति। साभापत्यपदाधिरोहणार्थमाज्ञप्तस्य मे मनसि ये केचिद् विचाराः प्रादुरभवन्, ते मया विदुषां पुरतः समुपस्थापिताः। तेषामुपादेयत्वे हेयत्वे वा सदस्या एव प्रमाणम्।

दर्शनपरिषदधिकारिभिर्विद्वज्जनसम्पर्कस्य मेऽवसरो दत्तः। तेन बाढमनुगृहीतोऽस्मि। तान् प्रति च मया भूयो भूयः कृतज्ञता प्रकटीक्रियते। अन्ततोऽहं काशीविश्वनाथं प्रार्थये यदस्याः परिषदोऽस्य विश्वविद्यालयस्य चोत्तरोत्तराभिवृद्धिः स्यादिति शम्॥

मुद्रक—बलदेवदास,
संसार प्रेस, काशीपुरा वाराणसी ।